Mallikarjun

Madhyandiniya mantra samhitā

माध्यन्दिनीय मंत्र संहिता

Sanskrit

Paper – Printed

1986 sambat (90 years old)

42 folio

9.6" x 4.4"

Complete

श्री मल्लिकार्जुन स्वामिन इदम्पुस्तकम्

अथ माध्यन्दिनीयमंत्रसंहिताप्रारम्भः ।

श्रीगणेशाय नमः ।



मुद्रक और प्रकाशक-

गङ्गाविष्णु श्रीकृष्णदास,

मालिक-" लक्ष्मीवेङ्कटेश्वर " स्टीम्-प्रेस, कल्याण-बंबई.

ॐ श्रीगणेशायनमः ॥ हरिः ॐ ॥ अथ प्रयोजनसंहिताप्रारंभः ॥ तत्र संध्यामंत्राः ॥ ॐ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ १ ॥ ॐ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः। पापेभ्योरक्षन्ताम्। यद्राव्यापापमकार्षम्मनसावाचाहस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किञ्चिद्दुरितंमयि । इदमहंमाममृतयोनौसूर्येज्योतिषि जुहोमि स्वाहा ॥ २ ॥ ॐ आपः पुनन्तु पृथिवीं पृथ्वी

मन्त्र० पूतापुनातुमां पुनन्तुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां यदुच्छिष्ट सं०
॥ २ ॥ मभोज्यंचयद्वादुश्चरितंमम सर्वम्पुनन्तुमामापोसताञ्चप्रतिग्र
हथ्ठंस्वाहा ॥ ३ ॥ ॐ अग्निश्चमामन्युश्चमन्युपतयश्चमन्यु
कृतेभ्यः।पापेभ्योरक्षन्ताम्। यदह्नापापमकार्षम्मनसावाचाह
स्ताभ्याम्।पद्भ्यामुदरेणाशिश्नाअहस्तदवलुम्पतु यत्किञ्चिदुरि
तंमयिइदमहम्मामममृतयोनौ सत्येज्योतिषि जुहोमिस्वाहा ॥ १ ॥
॥ ४ ॥ ॐ आपोहिष्टामयोभुवस्तानऽऊर्ज्जेदधातन। महेर

णायचक्षसे॥ ५ ॥ योवं÷शिवतमोरसस्तस्यभाजयतेहनं÷ ।
उशतीरिवमातरं÷ ॥ ६ ॥ तस्म्माऽअरंङ्गमामवोयस्यक्षयाय
जिन्वंथ॥ आपोजनयंथाचनः ॥ ७ ॥ ॐसुमित्रियानऽआप
ऽओषधय ः सन्तु दुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियश्चं
वयन्द्विष्म्मः ॥८॥ ॐद्रुपदादिवमुमुचानः स्विन्नःस्नातोमलां
दिव॥पूतंपवित्रेणेवाज्ज्यमापं÷शुन्धन्तुमैनंसः÷ ॥ ९ ॥ ॐऋत
ञ्चसत्यञ्चाभीद्धात्तपसोध्यंजायत ततोरात्र्यंजायततततः समुद्रो

मन्त्र॰ अर्णवः समुद्रादर्णवादधिसंवत्सरोऽअजायत अहोरात्राणिवि सं.
॥ २ ॥ दधद्विश्वस्यमिषतोवशी सूर्याचन्द्रमसौधातायथापूर्वमकल्प
यत् दिवञ्चपृथिवीञ्चान्तरिक्षमथोस्वः ॥ १० ॥ ॐ उद्वयन्तम
सस्परिस्वः पश्यन्तऽउत्तरम् । देवन्देवत्रासूर्य्यमगन्मज्ज्यो
तिरुत्तमम् ॥ ११ ॥ ॐ उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥
दृशेविश्वायसूर्य्यम् ॥ १२ ॥ ॐ चित्रन्देवानामुदगादनीकञ्च ॥ २ ॥
क्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरि

क्षठंसूर्य्यऽआत्माजगतस्तस्थुषश्च ॥ १३ ॥ ॐतच्चक्षुर्देवहितम्पु
रस्ताच्छुक्रमुच्चरत् । पश्येमशरदःशतञ्जीवेमशरदःशतठंशृणुया
मशरदःशतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शत
म्भूयश्चशरदःशतात् ॥ १४ ॥ ॐतेजोसिशुक्रममृतमायुष्पाऽ
आयुर्म्मेपाहि । देवस्यत्वासवितुःप्रसवेश्विनोर्ब्बाहुभ्याम्पू
ष्णोहस्ताभ्यामाददे ॥ १५ ॥ देवागातुविदोगातुंवित्त्वागातु
मित । मनसस्पतऽइमन्देवयज्ञठंस्वाहावातेधाः ॥ १६ ॥ अथ

तर्प्पणमन्त्राः ॥ आयन्तुनः पितरः सोम्यासोऽग्निष्वात्ताः पथि
भिर्द्देवयानैः ॥ अस्मिन्न्यज्ञेस्स्वधयामदन्तोऽधिब्रुवन्तुतेऽवन्त्व
स्मान् ॥ १ ॥ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सो
म्यासः ॥ असुंयऽईयुरवृकाऽऋतज्ञास्तेनोऽवन्तुपितरोहवेषु
॥ २ ॥ अङ्गिरसोनः पितरोनवग्वाऽअथर्वाणोभृगवः सोम्या
सः ॥ तेषांवयꣳसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम ॥ ३ ॥
ऊर्ज्जम्वहन्तीरमृतङ्घृतम्पयः कीलालम्परिस्स्रुतम् ॥ स्वधा

स्थंतुर्प्पयंतमेपितॄन् ॥ ४ ॥ पितृभ्यः स्वधायिभ्यः स्वधा
नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहे
भ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्नपितरोमीमदन्तपि
तरोतीतृपन्तपितरः पितरः शुन्धध्वम् ॥५॥ येचेहपितरोयेचने
हयाँश्चविद्मयाँ २ ॥ ऽउंचनप्रविद्म ॥ त्वंवेत्थयतितेजातवेदः
स्वधाभिर्य्यज्ञठ्ठंसुकृतंजुषस्व ॥ ६ ॥ मधुव्वाताऽऋतायतेम
धुंक्षरन्तिसिन्धवः ॥ माद्ध्वीर्न्नःसन्त्वोषधीः ॥ ७ ॥ मधुनक्त

मुतोषसोमधुमत्पार्थिवुरजः ॥ मधुद्यौरस्तुनःपिता ॥ ८ ॥
मधुमान्नोव्वनस्पतिर्म्मधुमाँ२ ॥ ऽअस्तुसूर्य्यः ॥ माध्वीर्ग्गावो
भवन्तुनः ॥ ९ ॥ नमोवःपितरोरसायनमोवःपितरःशोषाय
नमोवः पितरोजीवायनमोवः पितरःस्वधायैनमोवः पितरो
घोरायनमोवःपितरोमन्यवेनमोवःपितरः पितरोनमोवोगृहा
न्नःपितरोदत्तसतोवः पितरोदेष्मैतद्वः पितरोव्वासः ॥ १० ॥
॥ अथपूजनमन्त्राः ॥ ॐ महीद्यौः पृथिवीचनऽइमंयज्ञम्मि

मिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ १ ॥ भूतशुद्धिमन्त्रः ॥
ॐ येभूतानामधिपतयोविशिखासःकपर्दिनः ॥ तेषांꣳसहस्र
योजनेवधन्वानितन्मसि ॥ २ ॥ मातृकामन्त्रः ॥ ॐ अम्बेऽ
अम्बिकेऽम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकःसुभद्रि
काङ्काम्पीलवासिनीम् ॥ ३ ॥ प्राणप्रतिष्ठामन्त्राः ॥ समुद्र
स्यत्वावकयाग्नेपरिव्ययामसि ॥ पावकोऽअस्मभ्यꣳशि
वोभव ॥ ४ ॥ हिमस्यत्वाजरायुणाग्नेपरिव्ययामसि ॥

मन्त्र० पावको ऽअस्मभ्यᳬ शिवो भव ॥५॥ उपज्मन्नुपवेतसेवतरन सं.
॥५॥ दीष्वा ॥ अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमन्नो यज्ञ
म्पावकवर्ण्णᳬ शिवङ्कृधि ॥६॥ अपामिदन्न्ययनᳬ समुद्रस्य
निवेशनम् ॥ अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्म
भ्यᳬ शिवो भव ॥७॥ अग्ने पावक रोचिषा मन्द्रया देव जि
ह्वया ॥ आ देवान्वक्षि यक्षि च ॥८॥ स नः पावक दीदिवोऽग्ने देवाँ२ ॥५॥
ऽइहावह ॥ उप यज्ञᳬ हविश्च नः ॥९॥ पावकया यश्चितयन्त्या कृ

पाक्षामन्द्ररुरुच्चऽउषसोनभानुनां ॥ तूर्वन्नयामन्नेतंशस्यनूरणऽ
आयोघृणेनततृषाणोऽअजरः ॥ १० ॥ नमस्तेहरसेशोचिषे
नमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयःपाव
कोऽअस्मभ्यंशिवोभव ॥ ११ ॥ नृषदेवेड्प्सुषदेवेड्बर्हिष
देवेड्वनसदेवेट्स्वर्विदेवेट् ॥ १२ ॥ येदेवादेवानांयज्ञियायज्ञियां
नांसंवत्सरीणमुपभागमासते ॥ अहुतादोहविषोयज्ञेऽअ
स्मिन्त्स्वयम्पिबन्तुमधुनोघृतस्य ॥ १३ ॥ येदेवादेवेष्व

धिदेवुत्त्वमायुन्नयेब्रह्मणःपुरऽएतारोऽअस्य ॥ येऽअग्न्योनऽऋते
पवन्तेधामकिञ्चननतेदिवोनपृथिव्याऽअधिस्नुषु ॥ १४ ॥
प्राणदाऽअपानदाव्यानदावर्च्चोदावरिवोदाः ॥ अन्याँस्तेऽअ
स्मत्तपन्तुहेतयःपावकोऽअस्मभ्यꣳशिवोभव ॥ १५ ॥
॥ ४ ॥ ॐ अयम्पुरोभुवस्तस्यप्प्राणोभौवायनोवसन्तः प्राणा
यनोगायत्रीवासन्तीगायत्र्यैगायत्रङ्गायत्रादुपाꣳशुरुपाꣳशो
स्त्रिवृत्त्रिवृतो रथन्तरं वसिष्ठऽऋषिःप्प्रजापतिगृहीतयात्वया

प्प्राणङ्गृह्णामि प्प्रजाभ्यः ॥४॥ अयन्दक्षिणा विश्वकर्म्मा तस्य
मनो वैश्वकर्म्मणङ्ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारꣳ
स्वारादन्तर्य्यामोऽन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाज
ऋषिः प्प्रजापतिगृहीतया त्वया मनो गृह्णामि प्प्रजाभ्यः ॥५॥
अयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चा
क्षुष्या जगती वार्षी जगत्याऽऋक्समम्मृक्समाच्छुक्रः शु
क्रात्सप्तदशः ॥ सप्तदशाद्वैरूपञ्जमदग्निर्ऋषिः प्प्रजापतिगृही

मन्त्र०

तयात्वयाचक्षुर्गृह्णामिप्रजाभ्यः ॥६॥ इदमुत्तरात्स्वस्तस्य सं.

॥ ७ ॥ श्रोत्रꣳसौवꣳशुरच्छ्रौत्र्यनुष्टुप्शार्द्यनुष्टुभऽऐडमैडान्मन्थीमु

न्थिनंऽएकविꣳशऽएकविꣳशाद्वैराजंविश्वामित्रऽऋषिःप्र

जापतिगृहीतयात्वयाश्रोत्रङ्गृह्णामिप्रजाभ्यः ॥७॥ इयमुप

रिमतिस्तस्यैवाङ्मात्याहैमन्तीवाच्यः पङ्क्तिर्हैमन्तीपङ्क्त्यैनिध

नंवन्निधनवतऽआग्रयणऽ आग्रयणात्त्रिणवत्रयस्त्रिꣳशौत्रिण ॥ ७ ॥

वत्रयस्त्रिꣳशाभ्याꣳशाक्वररैवतेविश्वकर्म्मऽऋषिःप्रजापति

गृहीतया त्वया ग्वाचं ङ्गृह्णामि प्रजाभ्यो लोकन्ताऽइन्द्रम्

॥८॥ पञ्चगव्यमन्त्राः॥ ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥

धियोयोनः प्रचोदयात् ॥ ९ ॥ गन्धद्वारांदुराधर्षांनित्यपुष्टां

करीषिणीम् ॥ ईश्वरींसर्वभूतानां तामिहोपह्वयेश्रियम्॥ १०॥

आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् ॥ भवावाजस्य

सङ्गथे ॥ ११ ॥ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजि

नः ॥ सुरभिनोमुखाकरत्प्रणऽआयूंषितारिषत् ॥ १२ ॥

घृतम्मिमिक्षे घृतमंस्स्युयोनिर्घृतेश्श्रितोघृतम्म्वंस्स्युधाम ।
अनुष्ष्वुधमावंहमादयंस्स्वुस्वाहांकृतंवृषभवक्षिहुव्यम् । १३ ॥
देवस्यंत्त्वासवितुः प्प्रंसुवेश्श्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥ १४ ॥ देवतोत्थापनमन्त्रः ॥ ॐ उत्तिष्ठब्ब्रह्मण
स्स्पतेदेवुयन्तंस्त्वेमहे ॥ उपुप्प्रयंन्तुमुरुतंःसुदानंवुऽइन्द्रंप्प्रा
शूर्भवासचां ॥ १५ ॥ प्रतिष्ठामन्त्रः ॥ ॐ मनोजूतिर्ज्जुष
तामाज्ज्यंस्स्युबृहुस्प्पतिर्य्युज्ञमिमन्तंनोत्त्वरिंष्टंय्युज्ञठंसमिम

न्दं धातु ॥ विश्वेदेवासऽइहमादयान्तामोऽ३ प्रतिष्ठ ॥ १६ ॥
आवाहनमन्त्रः ॥ द्यामुच्छदग्निरिन्द्रोऽब्रह्मादेवोऽबृहस्पतिः ॥
सचेतसोविश्वेदेवायज्ञम्प्रावन्तुनःशुभे ॥ १७ ॥ आसन
मन्त्रः ॥ त्वंयविष्ठदाशुषोनॄंःपाहिशृणुधीगिरः ॥ रक्षातोकमु
तत्मना ॥ १८ ॥ अर्घमन्त्रः ॥ ॐ सहस्रशीर्षापुरुषः सह
स्राक्षःसहस्रपात् ॥ सभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥
॥ १९ ॥ आचमनमन्त्रः ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभव

न्तु पीतये ॥ शंय्योरभिस्रवन्तुनः ॥ २० ॥ स्नानमन्त्रः ॥
आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्ष
से ॥ २१ ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उश
तीरिव मातरः ॥ २२ ॥ तस्माऽअरङ्गमाम वो यस्य क्ष
यायजिन्वथ ॥ आपोजनयथाचनः ॥ २३ ॥ अथप
ञ्चामतस्नानमन्त्राः ॥ तत्र पयोमन्त्रः ॥ ॐ पयःपृथि
व्यां पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः

प्प्रादिशः सन्तुमह्यम् ॥ २४ ॥ दधिमन्त्रः ॥ ॐ दधिक्क्रा
व्णोऽअकारिषञ्जिष्णोरश्श्वस्यवाजिनः ॥ सुरभिनोमुखाकर
त्प्रणऽआयूंषितारिषत् ॥ २५ ॥ घृतमन्त्रः ॥ घृतम्मि
मिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ॥ अनुष्वधमा
वहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ॥ २६ ॥ मधुमन्त्रः ॥
मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः ॥ माद्ध्वीर्न्नः सन्त्वो
षधीः ॥ २७ ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः ॥

मन्त्र० मधुद्यौरस्तुनः पिता ॥ २८ ॥ मधुमान्नोवनस्पतिर्म्मधुमाँ२ सं.
॥१०॥ ऽअस्तुसूर्य्यः ॥ माध्वीर्गावोभवन्तुनः ॥ २९ ॥ शर्करामन्त्रः ॥
ॐ अपाᳬंरसमुद्वयसᳬंसूर्य्येसन्तᳬंसमाहितम् । अपाᳬंरसं
स्स्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्त्वाजुष्टं
गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥ ३० ॥ पुनः शुद्धो
दकस्नानमन्त्रः ॥ शुद्धवालः सर्वशुद्धवालोमणिवालस्त ॥१०॥
आश्विनाः श्येतः श्येताक्षोरुणस्तेरुद्रायपशुपतयेकर्णायामाअव

लिप्सारौद्रानभौरूपाःपार्ज्जुन्याः ॥ ३१ ॥ वस्त्रमन्त्रः ॥ ॐ
युवांसुवासाः परिवीतुऽआगात्सऽउश्रेयान्भवति जायमानः ॥
तंधीरासः कवयुऽउन्नयन्तिस्वाध्यो मनसादेवयन्तः ॥ ३२ ॥
अथ यज्ञोपवीतमन्त्रः॥ॐयज्ञोपवीतंपरमंपवित्रम्प्रजापतेर्यत्स
हजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतंबलमस्तु
तेजः ॥३३॥ अथसुगंधिद्रव्यमंत्रः ॥ ॐ अहिंरिवभोगैःपर्य्येति
बाहुंज्यायाहेतिम्परिबाधमानःहस्तुघ्नोविश्वांवयुनानिविद्वान्

पुमान्पुमांꣳसम्परिपातुव्विश्वतः॥ चन्दनमंत्रः॥ ॐ त्वाङ्गन्धर्वाऽ

अंखनंस्त्वामिन्द्रस्त्वाम्बृहस्पतिः त्वामोषधेसोमो राजाव्विद्वा

न्यक्ष्मादमुच्यत॥ ३४॥ अक्षतमन्त्रः॥ ॐ अक्षन्नमीमदन्त

ह्यवप्प्रियाऽअधूषत॥ अस्तोषतस्वभानवोविप्पानविष्ठया

मतीयोजान्विन्द्रतेहरी॥ ३५॥ पुष्पमन्त्रः॥ ॐ यत्पुरुषं

व्यदधुः कतिधाव्यकल्पयन्॥ मुखङ्किमस्यासीत्किम्बाहूकिमू

रूपादाऽउच्यते॥ ३६॥ बिल्वमन्त्रः॥ त्र्यम्बकंयजामहे

सुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीय

मामृतात् ॥ ३७ ॥ तुलसीमन्त्रः ॥ ॐइदंविष्णुर्विचक्रमेत्रे

धानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ ३८ ॥ दूर्वा

मन्त्रः ॥ ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥

एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच ॥ ३९ ॥ धूपमन्त्रः ॥

ॐ धूरसिधूर्व्वधूर्व्वन्तन्धूर्व्वतंय्योस्मान्धूर्व्वतितन्धूर्व्वयंव्वयन्धूर्व्वा

मः ॥ देवानामसिवह्नितमꣳसस्नितमम्पप्रितमञ्जुष्टतमन्देवहू

तंमम् ॥ ४० ॥ दीपमन्त्रः ॥ ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः
स्वाहासूर्य्योर्ज्ज्योतिर्ज्ज्योतिःसूर्य्यःस्वाहा ॥ अग्निर्व्वर्च्चोर्ज्ज्यो
तिर्व्वर्च्चःस्वाहा सूर्य्योव्वर्च्चोर्ज्ज्योतिर्व्वर्च्चःस्वाहा ॥ ज्योतिःसूर्य्यः
सूर्य्योर्ज्ज्योतिःस्वाहा ॥ ४१ ॥ नैवेद्यमन्त्रः ॥ ॐ अन्नंपतेन्नं
स्स्यनोदेह्यनमीवस्यंशुष्मिणः ॥ प्रप्रंदातारंतारिषऽऊर्ज्जंन्नो
धेहिद्विपदेचतुष्पदे ॥ ४२ ॥ फलमन्त्रः ॥ ॐ याःफलिनी
र्य्याऽअंफलाऽअंपुष्पायाश्चंपुष्पिणीः ॥ बृहस्पतिप्रसूता

स्तानोमुञ्चन्त्वहंस÷ ॥ ४३ ॥ दाक्षिणामन्त्रः ॥ ॐ हिरण्य
गर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृ
थिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥४४ ॥ आर्तिक्य
मन्त्रः ॥ आरांत्रिपार्थिवंरजंःपितुरंप्रायिधामंभि÷ ॥ दिवः
सदांसिबृहतीवितिष्ठसऽआत्वेषंवर्त्ततेतमं÷ ॥ ४५ ॥ पुष्पा
ञ्जलिमन्त्रः ॥ ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्र
थमान्यासन् ॥ तेहनाकम्महिमानंःसचन्तयत्रपूर्वेसाद्ध्याः

सान्तिर्देवाः ॥ ४६ ॥ अथस्वस्त्ययनमन्त्राः ॥ हरिः ॐ स्वस्ति
नऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥ स्वस्ति
नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ पयः
पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्व
तीः प्प्रदिशः सन्तुमह्यम् ॥ २ ॥ विष्णोरराटमसिविष्णोः श्न
प्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवे
त्वा ॥ ३ ॥ अग्निर्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवता

वसंवोदेवतारुद्द्रादेवतादित्त्यादेवतामुरुतोदेवातावि श्श्वेदेवा देव
ताबृहस्प्पति र्देवतेन्द्द्रोदेवतावरुणो देवता ॥ ४ ॥ द्यौःशान्तिर
न्तरिक्षुठंशान्ति÷पृथिवीशान्तिरापःशान्तिरोषधयःशान्ति÷॥
वनस्प्पतयःशान्तिर्विश्श्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्व्वठंशान्तिः
शान्तिरेवशान्तिःसामाशान्तिरेधि ॥ ५ ॥ विश्श्वानिदेवस
वितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ६ ॥ इमारुद्द्रा
यतवसेकपर्हिनेक्षयद्वीरायप्प्रभरामहेमतीः ॥ यथाशमसद्द्विपदे

 चतुष्पदेविश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ७ ॥ एतन्ते
 देवसवितर्य्यज्ञम्प्राहुर्बृहस्पतयेब्रह्मणे ॥ तेनयज्ञमवतेनयज्ञ
पतिन्तेनमामव ॥ ८ ॥ मनोजूतिर्जुषतामाज्यस्यबृहस्पति
र्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञठंसमिमन्दधातु ॥ विश्वेदेवास
ऽइहमादयन्तामो३म्प्रतिष्ठ ॥ ९ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रै
तेनयज्ञेनयजन्तेसर्व्वमेवप्रतिष्ठितम्भवति ॥ १० ॥ गणा
नान्त्वा गणपतिठंहवामहे प्रियाणान्त्वाप्रियपतिठंहवाम

हेनिधीनान्त्वांनिधिपतिंहवामहेवसोमम ॥ आहमजा
निगर्भधमात्त्वमजासिगर्भधम् ॥ ११ ॥ नमोगणेभ्योगण
पतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्च वोनमो
नमोगृत्सेभ्यो गृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योवि श्व
रूपेभ्यश्चवोनमः ॥ १२ ॥ अथकलशस्थापनादिमन्त्राः ॥
भूस्पर्शः ॥ भूरसिभूमिरस्यदितिरसि विश्वधायाविश्वस्यभु
वनस्यधर्त्री ॥ पृथिवींयच्छपृथिवीन्दृंहपृथिवींमाहिंसीः

॥ १ ॥ धान्यप्रक्षेपमन्त्रः ॥ धान्यमसि धिनुहि देवान्प्राणाय
त्त्वोदानायंत्त्वाव्यानायंत्त्वा ॥ दीर्घामनुप्रसितिमायुषेधान्दे
वोवःसविताहिरण्यपाणिःप्रतिगृभ्णात्त्वच्छिद्रेणपाणिना च
क्षुषेत्वामहीनाम्पयोसि ॥ २ ॥ कलशस्थापनमन्त्रः ॥ आजि
घ्रकलशम्मह्यात्त्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्त्तस्वसानः
सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्द्रयिः ॥ ३ ॥ जल ॥१५॥
मंत्रः ॥ वरुणस्स्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्स्थोवरु

णस्यऽऋतुसदन्न्यसिवरुणस्यऽऋतुसदनमसिवरुणस्यऽऋतुसदं
नमासीद ॥ ४ ॥ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्र
धारम् ॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा
काम धुक्षः ॥ ५ ॥ फलमन्त्रः ॥ याः फलिनीर्य्याऽअफलाऽअपुष्पा
याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वंहसः ॥ ६ ॥
पञ्चरत्नमन्त्रः ॥ परिवाजपतिः कविरग्निर्हव्यान्न्यक्रमीत् ॥
दधद्रत्नानि दाशुषे ॥ ७ ॥ हिरण्यमन्त्रः ॥ हिरण्यगर्भः समव

 त्तांताग्ग्रेभूतस्यंजातःपतिरेकंऽआसीत् ॥ सदाधारपृथिवीन्द्या
 मुतेमाङ्कस्मैदेवायंहविषाविधेम ॥ ८ ॥ गन्धमन्त्रः ॥ त्वाङ्ग
न्धुर्वाअंखनुँस्त्वामिन्द्रस्त्वांम्बृहस्पतिः ॥ त्वामोषधेसोमोरा
जांविद्वान्यक्ष्ममांदमुच्यत ॥ ९ ॥ ओषधीमंत्रः ॥ याऽओषं
धीःसोमंराज्ञीर्बह्वीःशुताविचक्षुणाः ॥ तासांमासित्वमुत्तमारङ्का
मांयुशःहृदे ॥ १० ॥ मृत्तिकामन्त्रः ॥ स्योनापृथिविनोभ
वानृक्षरानिवेशनी।यच्छानःशर्म्मसप्प्रथाः॥ ११ ॥दूर्वामन्त्रः ॥

काण्डात्काण्डात्परोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनु सहस्रेणशतेनच ॥ १२ ॥ अश्वत्थपत्रमन्त्रः ॥ अश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ १३ ॥ धान्यपूरणमन्त्रः ॥ पूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहाऽइषमूर्जंशतक्रतो ॥ १४ ॥ आवाहनमन्त्रः ॥ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशंसमानऽआयुः

मन्त्र० प्प्रमोषीः ॥ १५ ॥ अथ पुण्याहवाचनमन्त्राः ॥ सवितात्वा सं.
॥१७॥ सवानाꣳसुवतामग्निर्गृहपतीनाꣳसोमोव्वनस्पतीनाम् ॥ बृह
स्पतिर्व्वाचऽइन्द्रोज्यैष्ठ्यायरुद्रःपशुभ्योमित्रःसत्योव्वरुणोध
र्म्मपतीनाम् ।१। नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजः
प्प्रथमजꣳह्येतत् ॥ योबिभर्त्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृ
णुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ।२। उच्चातेजातमन्ध ॥१७॥
सोदिविसद्भूम्याददे ॥ उग्रꣳशर्म्ममहिश्रवः ॥ ३ ॥ पुनन्तु

मादेवजनाः पुनन्तुमनंसाधियंः ॥ पुनन्तुविश्वांभूतानिजातंवे
दः पुनीहिमां ॥४॥ यथेमांवाचंकल्याणीमावदांनिजनेभ्यः ॥
ब्रह्मराजन्याभ्याᳪंशूद्रायचार्यायचस्वायचारंणायच ॥
प्रियोदेवानांदक्षिणायैदातुरिहभूयासमयंमेकामः समृध्यतामुप
मादोनंमतु ॥ ५॥ सत्तरस्यऽऋद्धिरस्यगन्मज्योतिरमृताऽअ
भूम॥ दिवंपृथिव्याऽअध्यारुहामाविदामदेवान्स्वर्ज्योतिः
॥६॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥

स्वस्तिनुस्ताक्ष्र्यौअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ ७ ॥
श्रीश्चंते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपम
श्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाणसर्व्वलोकम्मंऽइ
षाण ॥ ८ ॥ अथ षोडशमातृकामन्त्राः ॥ तत्र गौरीमन्त्रः ॥
ॐ शर्म्मास्यवधूतुंरक्षोवधूताऽअरातयोदित्यास्त्वगसिप्रति
त्वादितिर्व्वेत्तु । अद्रिरसिवानस्पत्योग्रावासिपृथुबुध्नः प्रति
त्वादित्यास्त्वग्वेत्तु ॥१॥ अथ पद्मामन्त्रः ॥ ॐ पावकानः

सरस्वतीव्वाजेभिर्व्वाजिनीवती ॥ यज्ञंव्वष्टुधियावसुः ॥ २ ॥
अथ शचीम० ॥ निवेशनःसङ्गमनोव्वसूनांव्विश्वारूपाभिचष्टे
शचीभिः ॥ देवऽइवसवितासत्त्यधर्म्मेन्द्रोनतस्थौसमरेपथी
नाम् ॥ ३ ॥ अथ मेधाम० ॥ ॐमेधाम्मेव्वरुणोददातुमेधाम
ग्निःप्प्रजापतिः ॥ मेधामिन्द्रश्चव्वायुश्चमेधान्धाताददातुमे
स्स्वाहा ॥ ४ ॥ अथ सावित्रीम० ॥ ॐसवितात्त्वासवानाᳬं
सवतामग्निर्ग्गृहपतीनाᳬंसोमोव्वनस्प्पतीनाम् ॥ बृहस्प्पति

मन्त्र० वाँचऽइन्द्रोज्ज्यैष्ठ्यायरुद्रः पशुभ्योमित्त्रः सत्त्योवरुणोधर्म्मप सं०

॥१९॥ तीनाम् ॥ ५ ॥ अथ विजयाम० ॥ ॐ प्राणायस्स्वाहापाना

यस्वाहा व्यानाय स्स्वाहा ॥ अम्बेऽअम्बिकेऽम्बालिकेनमा

नयतिकश्श्चन ॥ ससंस्त्यश्वकः सुभद्रिकांकाम्पीलवासि

नीम् ॥ ६ ॥ अथ जयाम० ॥ ॐ बह्वीनाम्पिताबहुरस्यपुत्र

श्चिश्चाकृणोतिसमनावगत्य ॥ इषुधिः सङ्काः पृतनाश्चसर्वाः ॥१९॥

पृष्ठेतिनद्धोजयातिप्रसूतः ॥ ७ ॥ अथ देवसेनाम० ॥ ॐ इन्द्रऽ

आसान्नेताबृहस्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः॥ देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम् ।८।अथस्वधाम०।

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः॥ अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्धद्ध्वम्॥ ९ ॥ अथ स्वाहाम० ॥ स्वाहाप्प्राणेभ्यःसाधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्नयेस्स्वाहान्तरिक्षायस्स्वाहावायव

मन्त्र० वेस्वाहा ॥ दिवेस्स्वाहासूर्य्यायस्स्वाहा॥ १० ॥ अथ मातृम० ॥ सं.
॥२०॥ ॐ अनाधृष्टापुरस्तादग्नेराधिपत्त्यऽआयुम्र्मेदाःपुत्रवतीदक्षिण
तऽइन्द्रस्याधिपत्येप्रजाम्मेदाः सुखदापुश्चाद्देवस्स्य सवितुरा
धिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतो धातुराधिपत्त्येरायस्पोषं
म्मदाः॥ विधृतिरुपरिष्टादबृहस्पतेराधिपत्त्यऽओजोमेदा विश्वा
भ्योमानाष्ट्राभ्यस्पाहिमनोरश्वासि ॥ ११ ॥ अथ लोकमा ॥२०॥
तृम० ॥ ॐ रयिश्चमेरायश्चमेपुष्टंचमेपुष्टिश्चमेविभुचमेप्रभुचं

मेपूर्णञ्च मे पूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्च मेक्षुच्चमेयज्ञेन

कल्पन्ताम्॥१२॥ अथ धृतिम०॥ ॐभद्रङ्कर्णेभिःशृणुयामदे

वाभद्रम्पश्येमाक्षभिर्यजत्राः।स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्य

शेमहिदेवहितंयदायुः ॥१३॥ अथ पुष्टिम०॥ ॐअङ्गान्यात्म

न्भिषजातदश्विनात्मानमङ्गैःसमधात्सरस्वती ॥ इन्द्रस्य

रूपꣳशतमानमायुश्चन्द्रेणज्योतिरमृतन्दधाना ॥१४॥ अथ

तुष्टिम०॥ॐजातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः।

सनः पर्षदतिदुर्गाणिविश्वानावेवसिन्धुन्दुरितात्यग्निः ॥१५॥
अथ कुलदेवताम० ॥ ॐ व्वसोःपवित्रमसिशतधारंव्वसोःपवि
त्रमसिसहस्रधारम् ॥ देवस्त्वासवितापुनातुव्वसोःपवित्रेणश
तधारेणसुप्वाकामधुक्षः ॥ १६ ॥ अथ नवग्रहमन्त्राः ॥ आकृ
ष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवि
तारथेनादेवोयातिभुवनानिपश्यन् ॥ १ ॥ इमन्देवाऽअसपत्नꣳ
सुवद्ध्वंमहतेक्षत्रायमहतेज्यैष्ठ्याय महते जानराज्ज्यायेन्द्र

स्स्येन्द्रियायं ॥ इमममुष्ष्यंपुत्रममुष्ष्यैपुत्रमुस्स्यैविशऽएषवो
मीराजासोमोस्म्माकंम्ब्राह्मणानाᳪंराजा ॥ २ ॥ अग्निर्म्मूर्द्धा
दिवःककुत्पतिः पृथिव्याऽअयम् ॥ अपाᳪंरेताᳪंसिजिन्वति ॥
॥ ३ ॥ ॐ उद्बुद्ध्यस्स्वाग्नेप्प्रतिजागृहित्त्वमिष्टापूर्तेसᳬसृजेथा
मयञ्च ॥ अस्म्मिन्त्सधस्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमा
नश्च सीदत ॥ ४ ॥ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभाति
क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविण

मन्त्र० न्धेहिचित्रम् ॥ ५ ॥ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्र सं.
॥२२॥ म्पयः सोमम्प्रजापतिः ॥ ऋतेनं सत्यमिन्द्रियंविपानꣳशुक्रम
न्धसइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥६॥ शन्नोदेवीरभिष्ट
यऽआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥ ७ ॥ कया
नश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता
॥ ८ ॥ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भि ॥२२॥
रजायथाः ॥ ९ ॥ अथनवग्रहाधिदेवतामन्त्राः ॥ त्र्यम्बकं

ठ्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृ
त्योर्म्मुक्षीयमामृतात् ॥ १ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरा
त्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽ
इषाणसर्व्वलोकम्मंऽइषाण ॥ २ ॥ यदक्रन्दःप्प्रथमञ्जा
यमानःउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्य
बाहूऽउपस्तुत्यम्महिजातन्तेऽअर्व्वन् ॥ ३ ॥ विष्णोरराटम
सिविष्णोःश्नप्त्रेस्त्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णव

मसि विष्णवे त्वा ॥ ४ ॥ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसी
मतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसत
श्चयोनिमसतश्चविवः ॥ ५ ॥ त्रातारमिन्द्रमवितारमिन्द्र
ꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्व
स्तिनोमघवाधात्विन्द्रः ॥ ६ ॥ यमायत्त्वामखायत्वासूर्य
स्यत्वातपसे ॥ देवस्त्वासवितामद्ध्वानक्तुपृथिव्याःसꣳस्पृश
स्पाहि ॥ अर्चिरसिशोचिरसितपोसि ॥ ७ ॥ कार्षिरसिसमुद्र

स्युत्वाक्षितेंयाऽउन्नयामि ॥ समापोऽअद्धिरंग्मतुसमोषधीभि

रोषधीः ॥ ८ ॥ चित्रावसोस्वस्तितेपारमंशीय ॥ ९ ॥ अथ

प्रत्याधिदेवतामन्त्राः ॥ ॐ अग्निन्दूतम्पुरोदंधेहव्यवाहमुप

ब्रुवे ॥ देवाँ २ ॥ ऽआसांदयादिह ॥ १ ॥ अप्स्वग्नेसधिष्ट्

वसौषधीरनुरुद्धयसे ॥ गर्भेसञ्जायसेपुनः ॥ २ ॥ स्योना

पृथिविनोभवानृक्षरानिवेशनि ॥ यच्छानःशर्म्मसप्रथाः ॥ ३ ॥

इदंविष्णुर्विचक्रमेत्रेधानिदंधेपदम् ॥ समूढमस्यपांᳬसुरेस्वा

मन्त्र० हा ॥ ४ ॥ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमि सं.
॥२४॥ न्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः
॥ ५ ॥ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासिघर्माय
दीष्व ॥ ६ ॥ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिता
बभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तु वयꣳस्यामपतयोरयी
णाम् ॥ ७ ॥ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्त ॥२४॥
रिक्षे दिवितेभ्यःसर्प्पेभ्योनमः ॥ ८ ॥ ब्रह्मयज्ञानम्प्रथमम्पु

रस्ताद्धिसीमुत॒ः सुरुचोव्वेनऽआवः ॥ सबुद्ध्याऽउपमाऽअस्य

विष्ठाः सुतश्च योनिमसतश्च विवः ॥१॥ अथ गणेशादिपंचदे

वतामन्त्राः ॥ गणानान्त्वागणपतिꣳहवामहे प्प्रियाणान्त्वा

प्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेवसोमम ॥

आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥ १ ॥ अम्बेऽअम्बि

केम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्का

म्पीलवासिनीम् ॥२॥ वातोवामनोवागन्धर्वाःसप्तविꣳशतिः ॥

५

मन्त्र० तेऽअग्ने अश्वमयुञ्जँस्तेऽअस्मिन्नवमादधुः ॥ ३ ॥ घृतङ्घृतपा सं०
॥२५॥ वानः पिबत वसाँ वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥
दिशः प्प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्भ्यः स्वाहा ॥ ४ ॥
यावाङ्कशामधुमत्याश्विना सूनृतावती ॥ तया यज्ञम्मिमिक्षता
म् ॥ ५ ॥ अथ दिक्पालमन्त्राः ॥ त्रातारमिन्द्रमवितारमि
न्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ ॥२५॥
स्वस्ति नो मघवा धात्विन्द्रः ॥ १ ॥ अथ अग्निमन्त्रः ॥

त्वन्नोऽअग्ने वरुंणस्य विद्वान्देवस्यहेडोऽअवंयासिसीष्ठाः ॥
यजिंष्ठोवह्नितमःशोशुंचानोविश्वाद्वेषांꣳसिप्रमुंमुग्ध्यस्म्मत् ॥
॥ २ ॥ यममन्त्रः ॥ असिंयमोऽअस्स्यांदित्त्योऽअर्वन्नसिंत्रि
तोगुह्येनव्व्रतेनं ॥ असिसोमेंनसमयाविपृक्तऽआहुस्तेत्त्रीणिदि
विबन्धंनानि ॥ ३ ॥ नैर्ऋतमन्त्रः ॥ ॥ असुन्न्वन्तुमयंजमान
मिच्छस्तेनस्येत्यामन्विंहितस्करस्य ॥ अन्न्यमस्म्मदिच्छसा
तंऽइत्यानमोंदेविनिर्ऋतेतुब्भ्यंमस्तु ॥ ४ ॥ वरुणमन्त्रः ॥ इमम्मेव

मन्त्र० रुण श्रुधीहवमुद्याचमृडय ॥ त्वामवस्युराचके॥५॥व्वायमन्त्रः सं.
॥२६॥ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् ॥
व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिः सदानः
॥ ६ ॥ कुबेरमन्त्रः ॥ व्वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥
प्रजावन्तःसचेमहि ॥ ७ ॥ शिवमन्त्रः ॥ तमीशानञ्जगतस्त
स्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम्॥पूषानोयथाव्वेदसाम ॥२६॥
सद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ ८ ॥ ब्रह्ममन्त्रः ॥ ब्रह्मय

ज्ञानम्प्रथमम्पुरस्ताद्विसीमुतःसुरुचोवेन आवः ॥ सबुध्न्याऽ
उपमाऽअस्यविष्ठाःसुतश्चयोनिमसतश्चविवः ॥ १ ॥
शेषमन्त्रः ॥ स्योनापृथिविनो भवानृक्षरानिवेशनि ॥
यच्छानुःशर्म्मसुप्रथाः ॥ १० ॥ अथ क्षेत्रपालमन्त्रः ॥
नहिस्पशमविदन्नन्यमस्म्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥
एमेनमवृधन्नमृताऽअमर्त्यंवैश्वानरङ्क्षैत्रजित्यायदेवाः ॥ १ ॥
अथ अग्नेर्ध्यानमन्त्रः ॥ चत्वारिशृङ्गात्रयोऽअस्य पादाद्वे

शीर्षसुप्तहस्ताऽसोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहो देवो
मर्त्याँ२ ॥ ऽआविवेश ॥ १ ॥ अथाष्टाहुतिमन्त्राः ॥
त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ य
जिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषांꣳसिप्रमुमग्ध्यस्मत्
॥१॥ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥
अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसहवानऽएधि ॥ २ ॥
इमम्मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ ३ ॥

तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥
अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ ४ ॥
अयाश्चाग्नेऽस्यनभिशस्तिपाश्चसत्यमित्त्वमयाऽअसि ॥ अया
नोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा ॥ ५ ॥ येतेशतंवरु
णयेसहस्रंयज्ञियाः पाशावितताममहान्तः ॥ तेभिर्नोऽअद्यस
वितोतविष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्काः ॥ ६ ॥ उदुत्तमंव
रुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय ॥ अथावयमादि

मन्त्र० च्यव्व्रतेतुवानांगसोऽअदितयेस्स्याम ॥ ७ ॥ भवतन्नुःसमंन सं.
॥२८॥ सुसचेतसावरेपसौं ॥ मायुज्ञꣳहिꣳसिष्टम्मायुज्ञपतिञ्जातवेद
सौशिवौभवतमुद्यनः ॥ ८ ॥ अथ बर्हिर्होममन्त्रः ॥ देवांगा
तुविदोगातुंवित्वागातुमित ॥ मनसस्पतऽइमन्देवयुज्ञꣳस्वा
हावातेधाः ॥ ९ ॥ अथ पूर्णाहुतिमन्त्राः ॥ मूर्द्धानन्दिवोऽअ
रतिम्पृथिव्याँवैश्वानुरमृतऽआजातमुग्निम् ॥ कुविꣳसुम्म्राजु ॥२८॥
मतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ १ ॥ वसोःपवि

त्त्वंमसिशतधारम्वसोःपवित्रंमसिसहस्रधारम् ॥ देवस्त्वासवि
तापुनातुवसोःपवित्रेणशतधारेणसुप्वा कामधुक्षः ॥ २ ॥
पूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहाऽइष
मूर्ज्जं शतक्रतो ॥ ३ ॥ पुनस्त्वादित्यारुद्रावसवःसमिन्धता
म्पुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्वन्तन्वंवर्द्धयस्वस
त्याःसन्तुयजमानस्यकामाः ॥ ४ ॥ अथ भस्मधारणमन्त्रः ।
त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नोऽ

मन्त्र० अस्तुत्र्यायुषम् ॥ १ ॥ अथाभिषेकमन्त्राः ॥ ॐ आपोहिष्ठा सं.
॥२९॥ मयोभुवस्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥ १ ॥ योवः
शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ २ ॥
तस्माऽअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः
॥ ३ ॥ पुनन्तुमापितरःसोम्यासःपुनन्तुमापितामहाःपुनन्तुप्र
पितामहाः ॥ पवित्रेणशतायुषा ॥ पुनन्तुमापितामहाःपुनन्तु ॥२९॥
प्रपितामहाः ॥ पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॥ ४ ॥ अग्न

ऽआयूꣳषि पवसऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाधास्वदुच्छु

नां ॥ ५॥ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ॥ पुनन्तुवि

श्वाभूतानि जातवेदः पुनीहिमा॥ ६॥ पवित्रेणपुनीहिमाशुक्रेण

देवदीद्यत् ॥ अग्नेक्रत्वाक्रतूꣳ२ ॥ रनु ॥ ७ ॥ यत्तेपवित्रमर्च्चि

ष्यग्नेविततमन्तरा॥ ब्रह्मतेनपुनातुमा ॥ ८॥ पवमानःसोऽअद्य

नः पवित्रेणविचर्षणिः ॥ यः पोतासपुनातुमा ॥९॥ उभाभ्यां

न्देवसवितः पवित्रेणसवेनच ॥ मांपुनीहिविश्वतः ॥ १० ॥

मन्त्र० वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठाः ॥ सं.
॥३०॥ तयामदन्तःसधमादेषुवयꣳस्यामपतयोरयीणाम् ॥ ११ ॥
चित्पतिर्म्मापुनातु वाक्पतिर्म्मापुनातु देवोमासविता पुनात्त्व
च्छिद्रेण पवित्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यतेपवित्रपतेपवित्र
पूतस्ययत्कामःपुनेतच्छकेयम् ॥ १२ ॥ याऽओषधीःसोम
राज्ञीर्बह्वीःशतविचक्षणाः ॥ तासामसित्वमुत्तमारङ्कामाय ॥३०॥
शꣳहृदे ॥ १३ ॥ याऽओषधीःसोमराज्ञीर्विष्ठिताःपृथिवी

मनु ॥ बृहस्पतिंप्प्रसूताऽअस्यैसन्दत्तुन्ब्रीष्ठ्युंम् ॥ १४ ॥ देव
स्यंत्वासवितुःप्रसुवेश्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥ सरं
स्वत्यैव्वाचोयुन्तुर्व्युन्त्रियेदधामिबृहस्पतेंस्त्वासाम्राज्ज्येनाभिषि
ञ्चाम्यसौ ॥ १५ ॥ देवस्यंत्वासवितुःप्प्रंसुवेश्विनोर्ब्बाहुब्भ्यां
म्पूष्णोहस्ताब्भ्याम् ॥ सरंस्वत्त्यैव्वाचोयुन्तुर्व्युन्त्रेणाग्नेःसाम्रा
ज्ज्येनाभिषिञ्चामि ॥ १६ ॥ देवस्यत्वासवितुःप्प्रंसुवेश्विनोर्ब्बा
हुब्भ्यांम्पूष्णोहस्ताब्भ्याम् । अश्विनोर्भैषज्ज्येनुतेजंसेब्ब्रह्मवर्चं

मन्त्र० सायाभिषिञ्चामि सरस्वत्यैभैषज्ज्येनवीर्य्यायान्नाद्यायाभिषि सं.
॥३१॥ ञ्चामीन्द्रस्येन्द्रियेण बलायश्श्रियै यशसेभिषिञ्चामि ॥ १७॥
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषध
यः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः
सर्वꣳ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥ १८ ॥
अथ देवतामंत्रः ॥ नमः शम्भवायचमयोभवायचनमः शङ्क ॥३१॥
रायचमयस्करायचनमः शिवायचशिवतरायच ॥ १ ॥ विष्णु

मंत्रः ॥ इदंविष्णुर्व्विचंक्रमेत्रेधानिदंधेपुदम् ॥ समूढमस्यपाॐ
सुरेस्वाहां ॥ २ ॥ देवीमंत्रः ॥ अम्बेऽअम्बिकेम्बालिके न्न
मांनयातिकश्चन ॥ ससंस्त्यश्वकःसुभंद्रिकाङ्काम्पीलवासि
नीम् ॥ ३ ॥ गणेशमंत्रः ॥ गुणानान्त्वा गुणपंतिॐहवामहे
प्प्रियाणान्त्वा प्प्रियपंतिॐहवामहे निधीनान्त्वा निधिपतिं
ॐहवामहे व्वसोमम ॥ आहमंजानि गर्ब्भंधमात्वमंजासि ग
र्ब्भंधम् ॥ ४ ॥ सूर्य्यमन्त्रः ॥ आकृष्णेन रजंसा वर्त्तमा

नोनिवेशयन्नमृतम्मर्त्यंञ्च॥हिरण्ययेन सविता रथेनादेवोयाति
भुवनानिपश्यन् ॥ ५ ॥ त्र्यंबकमंत्रः ॥ त्र्यंबकंयजामहेसुग
न्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृ
तात् ॥ ६ ॥ ब्रह्ममंत्रः ॥ ब्रह्मयज्ञानंप्रथमम्पुरस्ताद्विसीमतःसुरु
चोवेनऽआवः॥सुबुद्ध्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्च
विवः॥७॥स्कन्दमन्त्रः ॥ यदक्रन्दःप्रथमंजायमानऽउ
द्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्य पक्षाहरिणस्यबाहूउपस्तु

त्युम्माहिंजातन्तेंऽअर्वन् ॥ ८ ॥ सर्प्पमंत्रः ॥ नमोस्तुसर्प्पेब्भ्यो
येकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेब्भ्यः सर्प्पेब्भ्यो
नमः ॥ ९ ॥ हनुमन्मंत्रः ॥ अस्म्मेरुद्रामेहनापर्वतासोवृत्र
हत्त्येभरहूतौसजोषाः ॥ यःशंसंतेस्तुवतेधायिपुज्ज्रऽइन्द्र
ज्ज्येष्ठाऽअस्म्माँ ॥ अवंतुदेवाः ॥ १० ॥ सप्तऋषिमंत्रः ॥
सप्तऽऋषयः प्रतिहिताःशरीरेसप्तरक्षन्तिसदमप्रमादम् ॥
सप्तापःस्वपतोलोकमीयुस्तत्रजागृतोऽअस्वप्नजौसत्रसदौच

देवौ ॥ ११ ॥ ध्रुवमंत्रः ॥ ध्रुवाक्षितिर्द्ध्रुवयोनिर्द्ध्रुवासिद्ध्रुवंछ्यो
निमासीदसाधुया ॥ उक्ख्यस्यकेतुम्प्रथमञ्जुषाणाश्विनाद्ध्व
र्य्यूसादयतामिहत्त्वा ॥ १२ ॥ भूतमंत्रः ॥ भूतायत्वानारा
तयेस्वराभिविख्यषुन्दृᳫंहन्तान्दुर्य्याः ॥ पृथिव्यामुर्वन्तरिक्ष
मन्वेमिपृथिव्यास्त्वानाभौसादयाम्म्यादित्याऽ उपस्थेग्नेहव्य
ᳫंरक्ष ॥ १३ ॥ विश्वकर्ममंत्रः ॥ विश्वकर्म्मन्हविषावर्द्धने
नत्रातारमिन्द्रमकृणोरवद्ध्यम् ॥ तस्मैविशःसमनमन्तपूर्वीरय

मुग्ग्रो विहव्व्योयथासंत् ॥१४॥ अगास्तिमंत्रः ॥कुम्भोवंनिष्टुर्ज्जं
निताशचीभिर्य्यस्मिन्नग्ग्रेयोन्न्यांगर्ब्भोऽअन्तः ॥ प्प्लाशिर्व्यं
क्त्तःशुतधारऽउत्त्सोदुहेनंकुम्भीस्वुधाम्पितृब्भ्यः ॥१५॥काली
मंत्रः॥कन्न्याऽइववहतुमेतुवाऽउंऽअञ्ज्यञ्जानाऽअभिचाकशीमि।
यत्रुसोमंःसूयतेयत्त्रंयुज्ञोघृतस्यधाराऽअभितत्पवन्ते ॥१६॥
लक्ष्मीमन्त्रः ॥ श्रीश्चंतेलक्ष्मीश्चुपत्न्यांवहोरात्त्रेपार्श्वेनक्षत्त्रा।
णिरूपमश्विनौव्यात्तंम् ॥ इष्णान्निषाणामुम्मंऽइषाणसर्वलो

कम्मऽइषाण ॥ १७ ॥ सरस्वतीमन्त्रः ॥ पञ्चनुद्यः सरस्व

तीमपियन्तिसस्रोतसः ॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्

॥ १८ ॥ पृथ्वीमन्त्रः ॥ स्योनापृथिविनोभवानृक्षरानिवेशनी॥

यच्छानःशर्म्मसप्प्रथाः ॥ १९ ॥ अम्मन्त्रः ॥ अप्स्वग्ग्नेसधि

ष्टवसौषधीरनरुद्ध्यसे ॥ गर्ब्भेसञ्जायसेपुनः ॥ २० ॥ तेजो

मन्त्रः ॥ ॥ अग्ग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे ॥ देवाँ॥२॥ आ

सादयादिह ॥ २१ ॥ वायुमन्त्रः ॥ व्वातोवामनोवागन्धर्व्वाः

सुप्तविंᳫशतिः ॥ तेऽअग्रेश्वंमयुँञ्जुँस्ते ऽअस्मिन्मुज्ञवमादधुः

॥२२॥ आकाशमन्त्रः॥याव॒ाङ्क॒शामधुंमत्त्याश्विंनासूनृतावती।

तयांयुज्ञम्मिमिक्षतम् ॥ २३ ॥ देवतापत्नीमन्त्रः ॥ तम्प

त्नीभिरनुंगच्छेमदेवाःपुत्रैर्भ्रातृंभिरुतवाहिरंण्यैः ॥ नाकङ्गृ

भ्णानाःसुकृतस्यंलोकेतृतीयेंपृष्ठेऽअधिंरोचनेदिवः ॥ २४ ॥

ऋग्वेदमन्त्रः ॥ अग्निमीळेपुरोहिंतंयुज्ञस्यंदेवमृत्विजम् ॥ होतां

रंरत्नुधातंमम् ॥ २५ ॥ यजुर्वेदमन्त्रः ॥ इषेत्वोर्ज्जेत्वावायवं

स्थदेवोवं÷सवितापप्रार्प्पयतु श्रेष्ठतमायकर्म्मणऽआप्प्यायद्ध्व
मग्घ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽ
ईशतमाघशंशसोद्ध्रुवाऽ अस्मिन्गोपतौस्यातबह्वीर्यजमान
स्य पशून्पाहि ॥ २६ ॥ सामवेदमन्त्रः ॥ अग्नऽआयाहिवी
तयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ २७ ॥ अथ
र्वमन्त्रः ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभि
स्स्रवन्तुनः ॥ २८ ॥ वास्तुमन्त्रः ॥ वास्तोष्पतेप्रतिजानीह्य

॥३५॥

स्मान्स्वावेशोऽअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्व
शन्नो भवाद्विपदेशंचतुष्पदे ॥ २९ ॥ समुद्रमन्त्रः ॥ समुद्रोसि
नभस्वानार्द्रदानुःशम्भूर्म्मयोभूराभिमांवाहिस्वाहा ॥ मारुतो
सिमरुतांगणःशम्भूर्म्मयोभूराभिमांवाहिस्वाहा ॥ वुस्यूरसिदु
वस्वाञ्छम्भूर्म्मयोभूराभिमांवाहिस्वाहा॥ ३० ॥पर्वतमन्त्रः॥
प्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरन्तिस्वसिचऽइयानाः ॥
ताऽआववृत्रन्नधुरागुदक्ताऽअहिम्बुध्न्यमनुरीयमाणाः ॥ वि

ष्णोर्व्विक्रमणमसि विष्णोर्व्विक्क्रान्तमसि विष्णोः क्क्रान्तमसि
॥ ३१ ॥ संवत्सरमन्त्रः ॥ संव्वत्सरोसिपरिवत्सरोसीदावत्सरो
सीद्वत्सरोसिवत्सरोसि ॥ उपसस्तेकल्पन्तामहोरात्रास्तेक
ल्पन्तामर्द्धमासास्तेकल्पन्ताम्मासास्ते कल्पन्तामृतवस्ते
कल्पन्ताᳩंसंव्वत्सरस्तेकल्पन्ताम्॥ ३२ ॥ऋतुमंत्रः। व्वसन्तेन
ऋतुनादेवाव्वसवस्त्रिवृतास्तुताः ॥ रथन्तरेणतेजसाहविरिन्द्रेव्व
योदधुः ॥ ३३ ॥ ग्ग्रीष्मेणऽऋतुनादेवारुद्राः पञ्चदशेस्तुताः

बृहतायशंसाबलंहविरिन्द्रेवयोदधुः ॥ ३४ ॥ वर्षाभिर्ऋतुना
दित्यास्तोमेसप्तदशेस्तुताः ॥ वैरूपेणविशौजसाहविरिन्द्रेवयो
दधुः॥ ३५ ॥ शारदेनऽऋतुनादेवाऽएकविंशऽऋभवस्तुताः॥
वैराजेनाश्रियाश्रियंहविरिन्द्रेवयोदधुः ॥३६॥ हेमन्तेनऽऋतु
नादेवास्त्रिणवेमरुतस्तुताः ॥ बलेनशक्वरीःसहोहविरिन्द्रेवयो
दधुः ॥ ३७ ॥ शैशिरेणऽऋतुनादेवास्त्रयस्त्रिंशेमृतास्तुताः ॥
सत्येनरेवतीःक्षत्रंहविरिन्द्रेवयोदधुः॥ ३८ ॥ माससमन्त्रः॥अर्द्ध

मन्त्र० मासाः परूꣳषि ते मासाऽआच्छ्यन्तु शम्म्यन्तः ॥ अहोरात्त्राणि सं०
॥३७॥ मरुतो विलिष्टꣳ सूदयन्तु ते ॥ ३९ ॥ पक्षमन्त्रः ॥ इमौ ते पक्षावजरौ
पतत्त्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ॥ ताभ्यां पतेम
सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः ॥ ४० ॥
शुक्लपक्षमन्त्रः ॥ अग्नेः पक्षतिर्व्वायोर्निपक्षतिरिन्द्रस्य तृतीया सो
मस्य चतुर्थ्यदित्यै पंचमीन्द्राण्यै षष्ठी मरुताꣳ सप्तमी बृहस्पते ॥३७॥
रष्टम्म्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वाद

शीयमस्यत्रयोदशी ॥४१॥ कृष्णपक्षतिथिमन्त्रः॥इन्द्राग्न्योः
पक्षतिःसरस्वत्यै निपक्षतिर्म्मित्रस्यतृतीयापाञ्चतुर्थीनिर्ऋत्यै
पञ्चम्म्यग्नीषोमयोःषष्ठीसर्प्पाणांसप्तमीविष्णोरष्टमीपूष्णो
नवमीत्वष्टुर्दशमीन्द्रस्यैकादशीवरुणस्यद्वादशीयमस्यत्रयोदशी
द्यावापृथिव्योर्दक्षिणंपार्श्वंविश्वेषान्देवानामुत्तरम् ॥४२॥ दिन
मन्त्रः ॥ अह्नेपारावतानालभते रात्र्यैसीचापूरहोरात्रयोःसन्धि
भ्योजतूर्म्मासेभ्योदात्यौहान्त्संवत्सरायमहतःसुपर्णान् ४३।

अथ नक्षत्रमन्त्राः ॥ तत्रअश्विनीमन्त्रः ॥ याबाङ्कशामधुमत्त्यश्विनासूनृतावती। तयायज्ञम्मिमिक्षतम्। १। भरणीमन्त्रः। यमायत्त्वामखायत्त्वासूर्य्यस्यत्त्वातपसे ॥ देवस्त्वासविता मद्ध्वानक्तुपृथिव्याः सछस्पृशस्पाहि ॥ अर्चिरसिशोचिरसितपोसि॥ २॥ कृत्तिकामन्त्रः ॥ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवेदेवाँ २ ॥ ऽआसादयादिह ॥ ३ ॥ रोहिणीमन्त्रः ॥ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तु

वृयछंस्स्यांमुपतंयोरयुणाम्म् ॥४॥ मृगाशिरामन्त्रः ॥ सोमोधे
नुङ्कसोमोअर्वन्तमाशुङ्कसोमोवीरंकर्म्मण्यन्ददाति ॥ सादन्यंवि
दत्थ्यङ्कसभेयंम्पितृश्रवंणंय्योददांशदस्स्मै ॥५॥ आर्द्रामन्त्रः॥
इमारुद्रायंतवसेकपर्द्दिनेक्षयद्वीरायप्प्रभरामहेमतीः ॥ यथाश
मसंद्विपदेचतुंष्पदेविश्वंम्पुष्टङ्ग्रामेऽअस्म्मिन्ननातुरम् ॥ ६ ॥
पुनर्वसुमन्त्रः ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपिता
सपुत्त्रः ॥ विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्ज्जातमदितिर्ज्ज

नित्वम् ॥७॥ पुष्यमन्त्रः॥ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्वि
भातिक्क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्प्रजाततदस्मासुद्द्रविं
णन्धेहिचित्रम् ॥८॥ आश्लेषामन्त्रः॥ नमोस्तुसर्प्पेभ्योयेके
चपृथिवीमनु॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥९॥
मघामन्त्रः ॥ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सो
म्म्यासः ॥ असुंय्यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु
॥१०॥ पूर्वामन्त्रः॥ भगप्प्रणेतर्भगसत्त्यराधोभगेमान्धियमुदं

वादद्वन्नः ॥ मगुप्मनोंजनयुगोभिरश्वैर्भगुप्मनृभिर्नृवन्तं÷स्याम

॥११॥ उत्तरामन्त्रः ॥ अर्य्यमणम्बृहस्पतिमिन्द्रन्दानायचो

दय ॥ वाचंविष्णुठंसरस्वतीᳬं सवितारञ्चवाजिनᳬंस्वाहा

॥१२॥ हस्तमन्त्रः ॥ उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवं÷॥दृशे

विश्वायसूर्य्यम् ॥ १३ ॥ चित्रामन्त्रः ॥ त्वष्टांतुरीपोऽअद्भुतऽ

इन्द्राग्नीपुष्टिवर्द्धना॥द्विपदाचच्छन्दऽइन्द्रियमुक्षागौर्नवयोदधुः

॥१४॥स्वातीमन्त्रः॥वायुरग्रेगायज्ञप्रीःसाकङ्गन्मनंसायज्ञम्।

शिवोनियुङ्क्ष्वँ शिवाभिः ॥ १५ ॥ विशाखामन्त्रः ॥ इन्द्राग्नी
आगतꣳ सुतङ्गीर्भिर्नभोवरेण्यम् ॥ अस्यपातन्धियेषिता
॥ १६ ॥ अनुराधामन्त्रः ॥ नमोमित्रस्यवरुणस्य चक्षसेम
होदेवायतदृतꣳसपर्य्यत ॥ दूरेदृशेदेवजातायकेतवेदिवस्पुत्रा
यसूर्य्यायशꣳसत ॥ १७ ॥ ज्येष्ठामन्त्रः ॥ त्रातारमिन्द्रमवि
तारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूत
मिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥ १८ ॥ मूलमन्त्रः ॥

मातांचंतेपिताचतेग्रंवृक्षस्यंरोहतः ॥ प्रतिलामीतितेपितागभे
माष्टिमंतꣳसयत् ॥ १९ ॥ पूर्वाषाढामन्त्रः ॥ अपांघमदभिशं
स्तीरशस्तिहाथेन्द्रोद्युम्न्नायाभवत् ॥ देवास्तंऽइन्द्रसख्यायंये
मिरेबृहद्भानोमरुद्गण ॥ २० ॥ उत्तराषाढामन्त्रः ॥ विश्वेदे
वासऽआगंतशृणुतामंइमꣳहवम् ॥ एदम्बर्हिर्निषीदत ॥ २१ ॥
श्रवणमन्त्रः ॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोः
स्स्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्वा ॥ २२ ॥

मन्त्र० धनिष्ठामन्त्रः ॥ वसोः॑ पवित्र॑मसि द्यौर॑सि पृथि॒व्य॑सि मा॒तरि॒

॥४१॥ श्व॑नो घ॒र्म्मो॑ऽसि वि॒श्वधा॑ऽअसि ॥ प॒र॒मेण॒ धाम्ना॒ दृ॒ꣳह॑स्व॒ मा

ह्वा॒र्म्मा ते॑ य॒ज्ञप॑ति॒र्ह्वा॑र्षीत् ॥ २३ ॥ शततारकामन्त्रः ॥ व॒रु॑ण

स्यो॒त्तम्भ॑नमसि॒ व॒रु॑णस्य स्कम्भ॒सर्ज्ज॑नी स्थो॒ वरु॑णस्य॒ऽ

ऋ॒तु॒सद॑न्यसि॒ वरु॑णस्य ऋत॒सद॑नमसि॒ वरु॑णस्य ऋत॒सद॑न॒मासी॑द

॥ २४ ॥ पूर्वाभाद्रपदामन्त्रः ॥ त्वन्नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान्दे॒

वस्य॒ हेडो॒ऽअव॑यासिसीष्ठाः ॥ यजि॑ष्ठो॒ वह्नि॑तमः॒ शोशु॑चानो वि ॥४१॥

सं०

श्वाद्वेषांᳬंसिप्प्रमुंमुग्ध्युस्मत् ॥ २५ ॥ उत्तराभाद्रपदामन्त्रः ॥
अहिंरिवभोगैः पर्य्येतिबाहुᳬंज्यायाहेतिम्पांरिबाधमानः ॥
हस्तुघ्नोविश्वांव्वयुनांनिव्विद्वान्पुमान्पुमांᳬंसम्पारिपातुव्विश्वतः
॥ २६ ॥ रेवतीमन्त्रः ॥ पूषन्तवंव्व्रतेव्वयन्नरिंष्येमकदांचन ॥
स्तोतारंस्तऽइहस्स्मसि ॥ २७ ॥

इति माध्यन्दिनीयमन्त्रसंहिता समाप्ता ॥

||४२||

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज-गंगाविष्णुना स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशितम्। संवत् १९८६, शके १८५१।

पुस्तक मिलनेका ठिकाना–

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" स्टीम् प्रेस,
कल्याण–बंबई.

खेमराज श्रीकृष्णदास,
"श्रीवेंकटेश्वर" स्टीम् प्रेस,
खेतवाडी–बंबई.

||४२||

अत्रेयमभ्यर्थना।

अत्रास्माकं मुद्रणालये ऋग्वेदादयो वेदा उपनिषदो वेदान्तग्रन्था महाभारतादीतिहासाः श्रीमद्भागवतादि-महापुराणोपपुराणानि धर्मशास्त्र-कर्मकाण्ड-व्याकरण-न्याय-योग-सांख्य-मीमांसादिशास्त्रीयग्रन्थाः काव्य-नाटक-चम्पू-प्रभृतयो ग्रन्थाः सहस्र-नामाद्यनेकस्तोत्रग्रन्थाश्च विविधभाषाग्रन्थाश्च सीसकोत्तममहल्लघ्वक्षरैर्म-नोहरं मुद्रिता आसते योग्यमूल्येन कय्याः सन्ति, तांश्च ग्राहकाः यथापुस्तकसूचीपत्रं मूल्यप्रेषणेन प्राप्नुयुः।

इति माध्यन्दिनीयमंत्रसंहितासमाप्ता ।